# Shri Dattatreya Sahasranama Stotram 2

# શ્રીદત્તાત્રેયસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : dattasahasranAmastotram 2

File name : dattasahasranAmastotram2.itx

Category : sahasranAma, deities_misc, dattAtreya, stotra

Location : doc_deities_misc

Proofread by : NA

Description-comments : dattAtreyastutimanjari p.128 and Telugu scan below

Latest update : October 1, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2023

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયસહસ્રનામસ્તોત્રમ્ ૨

નિખિલાગમતત્ત્વજ્ઞ બ્રહ્મજ્ઞાનપરાયણ ।
વદાસ્માકં મુક્ત્યુપાયં સૂત સર્વોપકારકમ્ ॥ ૧॥

સર્વદેવેષુ કો દેવઃ સદ્યો મોક્ષપ્રદો ભવેત્ ।
કો મનુર્વા ભવેત્તસ્ય સદ્યઃ પ્રીતિકરો ધ્રુવમ્ ॥ ૨॥

સૂત ઉવાચ -
નિગમાગમતત્ત્વજ્ઞો હ્યવધૂતશ્ચિદમ્બરઃ ।
ભક્તવાત્સલ્યપ્રવણો દત્ત એવ હિ કેવલઃ ॥ ૩॥

સદા પ્રસન્નવદનો ભક્તચિન્તૈકતત્પરઃ ।
તસ્ય નામાન્યનન્તાનિ વર્તન્તેઽથાપ્યદઃ પરમ્ ॥ ૪॥

દત્તસ્ય નામસાહસ્રં તસ્ય પ્રીતિવિવર્ધનમ્ ।
યસ્ત્વિદં પઠતે નિત્યં દત્તાત્રેયૈકમાનસઃ ॥ ૫॥

મુચ્યતે સર્વપાપેભ્યઃ સ સસ્થો નાત્ર સંશયઃ ।
અન્તે તદ્ધામ સંયાતિ પુનરાવૃત્તિદુર્લભમ્ ॥ ૬॥

અસ્ય શ્રીમદ્દત્તાત્રેયસહસ્રનામસ્તોત્રમન્ત્રસ્ય અવધૂત ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । દિગમ્બરો દેવતા । ૐ બીજમ્ । હ્રીં શક્તિઃ ।
ક્રૌં કીલકમ્ । શ્રીદત્તાત્રેયપ્રીત્યર્થે જપે વિનિયોગઃ ॥

અથ ધ્યાનમ્ -
દિગમ્બરં ભસ્મવિલેપિતાઙ્ગં બોધાત્મકં મુક્તિકરં પર્સન્નમ્ ।
નિર્માનસં શ્યામતનું ભજેઽહં દત્તાત્રેયં બ્રહ્મસમાધિયુક્તમ્ ॥

અથ સહસ્રનામસ્તોત્રમ્ ।
દત્તાત્રેયો મહોયોગી યોગેશશ્ચામરપ્રભુમ્ ।
મુનિર્દિગમ્બરો બાલો માયામુક્તો મદાપહઃ ॥ ૧॥

અવધૂતો મહાનાથઃ શઙ્કરોઽમરવલ્લભઃ ।
મહાદેવશ્ચાદિદેવઃ પુરાણપ્રભુરીશ્વરઃ ॥ ૨॥

સત્ત્વકૃત્સત્ત્વભૃદ્ભાવઃ સત્ત્વાત્મા સત્ત્વસાગરઃ ।
સત્ત્વવિત્સત્ત્વસાક્ષી ચ સત્ત્વસાધ્યોઽમરાધિપઃ ॥ ૩॥

ભૂતકૃદ્ભૂતભૃચ્ચૈવ ભૂતાત્મા ભૂતસમ્ભવઃ ।
ભૂતભાવો ભવો ભૂતવિત્તથા ભૂતકારણઃ ॥ ૪॥

ભૂતસાક્ષી પ્રભૂતિશ્ચ ભૂતાનાં પરમા ગતિઃ ।
ભૂતસઙ્ગવિહીનાત્મા ભૂતાત્મા ભૂતશઙ્કરઃ ॥ ૫॥

ભૂતનાથો મહાનાથશ્ચાદિનાથો મહેશ્વરઃ ।
સર્વભૂતનિવાસાત્મા ભૂતસન્તાપનાશનઃ ॥ ૬॥

સર્વાત્મા સર્વભૃત્સર્વઃ સર્વજ્ઞઃ સર્વનિર્ણયઃ ।
સર્વસાક્ષી બૃહદ્ભાનુઃ સર્વવિત્સર્વમઙ્ગલઃ ॥ ૭॥

શાન્તઃ સત્યઃ સમઃ પૂર્ણો હ્યેકાકી કમલાપતિઃ ।
રામો રામપ્રિયશ્ચૈવ વિરામો રામકારણમ્ ॥ ૮॥

શુદ્ધાત્મા પાવનોઽનન્તઃ પ્રતીતઃ પરમાર્થભૃત્ ।
હંસસાક્ષી વિભુશ્ચૈવ પ્રભુઃ પ્રલય ઇત્યપિ ॥ ૯॥

સિદ્ધાત્મા પરમાત્મા ચ સિદ્ધાનાં પરમા ગતિઃ ॥

સિદ્ધિસિદ્ધસ્તથા સાધ્યઃ સાધનો હ્યુત્તમસ્તથા ॥ ૧૦॥

સુલક્ષણઃ સુમેધાવી વિદ્યાવાન્વિગતાન્તરઃ ।
વિજ્વરશ્ચ મહાબાહુર્બહુલાનન્દવર્ધનઃ ॥ ૧૧॥

અવ્યક્તપુરુષઃ પ્રાજ્ઞઃ પરજ્ઞઃ પરમાર્થદૃક્ ।
પરાપરવિનિર્મુક્તો યુક્તસ્તત્ત્વપ્રકાશવાન્ ॥ ૧૨॥

દયાવાન્ભગવાન્ભાવી ભાવાત્મા ભાવકારણઃ ।
ભવસન્તાપનાશશ્ચ પુષ્પવાન્પણ્ડિતો બુધઃ ॥ ૧૩॥

પ્રત્યક્ષવસ્તુર્વિશ્વાત્મા પ્રત્યગ્બ્રહ્મ સનાતનઃ ।
પ્રમાણવિગતશ્ચૈવ પ્રત્યાહારનિયોજકઃ ॥ ૧૪॥

પ્રણવઃ પ્રણવાતીતઃ પ્રમુખઃ પ્રલયાત્મકઃ ।

મૃત્યુઞ્જયો વિવિક્તાત્મા શઙ્કરાત્મા પરો વપુઃ ॥ ૧૫॥

પરમસ્તનુવિજ્ઞેયઃ પરમાત્મનિ સંસ્થિતઃ ।
પ્રબોધકલનાધારઃ પ્રભાવપ્રવરોત્તમઃ ॥ ૧૬॥

ચિદમ્બરશ્ચિદ્વિલાસશ્ચિદાકાશશ્ચિદુત્તમઃ ।
ચિત્તચૈતન્યચિત્તાત્મા દેવાનાં પરમા ગતિઃ ॥ ૧૭॥

અચેત્યશ્ચેતનાધારશ્ચેતનાચિત્તવિક્રમઃ ।
ચિત્તાત્મા ચેતનારૂપો લસત્પઙ્કજલોચનઃ ॥ ૧૮॥

પરબ્રહ્મ પરં જ્યોતિઃ પરં ધામ પરન્તપઃ ।
પરં સૂત્રં પરં તન્ત્રં પવિત્રં પરમોહવાન્ ॥ ૧૯॥

ક્ષેત્રજ્ઞઃ ક્ષેત્રગઃ ક્ષેત્રઃ ક્ષેત્રાધારઃ પુરઞ્જનઃ ।
ક્ષેત્રશૂન્યો લોકસાક્ષી ક્ષેત્રવાન્બહુનાયકઃ ॥ ૨૦॥

યોગેન્દ્રો યોગપૂજ્યશ્ચ યોગ આત્મવિદાં શુચિઃ ।
યોગમાયાધરઃ સ્થાણુરચલઃ કમલાપતિઃ ॥ ૨૧॥

યોગેશો યોગનિર્માતા યોગજ્ઞાનપ્રકાશનઃ ।
યોગપાલો લોકપાલઃ સંસારતમનાશનઃ ॥ ૨૨॥

ગુહ્યો ગુહ્યતમો ગુપ્તો મુક્તો યુક્તઃ સનાતનઃ ।
ગહનો ગગનાકારો ગમ્ભીરો ગણનાયકઃ ॥ ૨૩॥

ગોવિન્દો ગોપતિર્ગોપ્તા ગોભાગો ભાવસંસ્થિતઃ ।
ગોસાક્ષી ગોતમારિશ્ચ ગાન્ધારો ગગનાકૃતિઃ ॥ ૨૪॥

યોગયુક્તો ભોગયુક્તઃ શઙ્કામુક્તસમાધિમાન્ ।
સહજઃ સકલેશાનઃ કાર્તવીર્યવરપ્રદઃ ॥ ૨૫॥

સરજા વિરજાઃ પુંસો પાવનઃ પાપનાશનઃ । પુમાન્
પરાવરવિનિર્મુક્તઃ પરઞ્જ્યોતિઃ પુરાતનઃ ॥ ૨૬॥

નાનાજ્યોતિરનેકાત્મા સ્વયઞ્જ્યોતિઃ સદાશિવઃ ।
દિવ્યજ્યોતિર્મયશ્ચૈવ સત્યવિજ્ઞાનભાસ્કરઃ ॥ ૨૭॥

નિત્યશુદ્ધઃ પરઃ પૂર્ણઃ પ્રકાશઃ પ્રકટોદ્ભવઃ ।
પ્રમાદવિગતશ્ચૈવ પરેશઃ પરવિક્રમઃ ॥ ૨૮॥

યોગી યોગો યોગપશ્ચ યોગાભ્યાસપ્રકાશનઃ ।
યોક્તા મોક્તા વિધાતા ચ ત્રાતા પાતા નિરાયુધ્યઃ ॥ ૨૯॥

નિત્યમુક્તો નિત્યયુક્તઃ સત્યઃ સત્યપરાક્રમઃ ।
સત્ત્વશુદ્ધિકરઃ સત્ત્વસ્તથા સત્ત્વમ્ભૃતાં ગતિઃ ॥ ૩૦॥

શ્રીધરઃ શ્રીવપુઃ શ્રીમાન્ શ્રીનિવાસોઽમરાર્ચિતઃ ।
શ્રીનિધિઃ શ્રીપતિઃ શ્રેષ્ઠઃ શ્રેયસ્કશ્ચરમાશ્રયઃ ॥ ૩૧॥

ત્યાગી ત્યાગાર્થસમ્પન્નસ્ત્યાગાત્મા ત્યાગવિગ્રહઃ ।
ત્યાગલક્ષણસિદ્ધાત્મા ત્યાગજ્ઞસ્ત્યાગકારણઃ ॥ ૩૨॥

ભોગો ભોક્તા તથા ભોગ્યો ભોગસાધનકારણઃ ।
ભોગી ભોગાર્થસમ્પન્નો ભોગજ્ઞાનપ્રકાશનઃ ॥ ૩૩॥

કેવલઃ કેશવઃ કૃષ્ણઃ કંવાસાઃ કમલાલયઃ ।
કમલાસનપૂજ્યશ્ચ હરિરજ્ઞાનખણ્ડનઃ ॥ ૩૪॥

મહાત્મા મહદાદિશ્ચ મહેશોત્તમવન્દિતઃ ।
મનોબુદ્ધિવિહીનાત્મા માનાત્મા માનવાધિપઃ ॥ ૩૫॥

ભુવનેશો વિભૂતિશ્ચ ધૃતિર્મેધા સ્મૃતિર્દયા ।
દુઃખદાવાનલો બુધ્દઃ પ્રબુધ્દઃ પરમેશ્વરઃ ॥ ૩૬॥

કામહા ક્રોધહા ચૈવ દમ્ભદર્પમદાપહઃ ।
અજ્ઞાનપતિમિરારિશ્ચ ભવારિર્ભુવનેશ્વરઃ ॥ ૩૭॥

રૂપકુદ્રૂપભૃદ્રૂપી રૂપાત્મા રૂપકારણઃ ।
રૂપજ્ઞો રૂપસાક્ષી ચ નામરૂપો ગુણાન્તકઃ ॥ ૩૮॥

અપ્રમેયઃ પ્રમેયશ્ચ પ્રમાણં પ્રણવાશ્રયઃ ।
પ્રમાણરહિતોઽચિન્ત્યશ્ચેતનાવિગતોઽજરઃ ॥ ૩૯॥

અક્ષરોઽક્ષરમુક્તશ્ચ વિજ્વરો જ્વરનાશનઃ ।
વિશિષ્ટો વિત્તશાસ્ત્રી ચ દૃષ્ટો દૃષ્ટાન્તવર્જિતઃ ॥ ૪૦॥

ગુણેશો ગુણકાયશ્ચ ગુણાત્મા ગણભાવનઃ ।
અનન્તગુણસમ્પન્નો ગુણગર્ભો ગુણાધિપઃ ॥ ૪૧॥

ગણેશો ગુણનાથશ્ચ ગુણાત્મા ગણભાવનઃ ।
ગણબન્ધુર્વિવેકાત્મા ગુણયુક્તઃ પરાક્રમી ॥ ૪૨॥

અતર્ક્યઃ ક્રતુરગ્નિશ્ચ કૃતજ્ઞઃ સફલાશ્રયઃ ।
યજ્ઞશ્ચ યજ્ઞફલ્દો યજ્ઞ ઇજ્યોઽમરોત્તમઃ ॥ ૪૩ ॥

હિરણ્યગર્ભઃ શ્રીગર્ભઃ ખગર્ભઃ કુણપેશ્વરઃ ।
માયાગર્ભો લોકગર્ભઃ સ્વયમ્ભૂર્ભુવનાન્તકઃ ॥ ૪૪ ॥

નિષ્પાપો નિબિડો નન્દી બોધી બોધસમાશ્રયઃ ।
બોધાત્મા બોધનાત્મા ચ ભેદવૈતણ્ડખણ્ડનઃ ॥ ૪૫ ॥

સ્વાભાવ્યો ભાવનિર્મુક્તો વ્યક્તોઽવ્યક્તસમાશ્રયઃ ।
નિત્યતૃપ્તો નિરાભાસો નિર્વાણઃ શરણઃ સુહૃત્ ॥ ૪૬ ॥

ગુહ્યેશો ગુણગમ્ભીરો ગુણદોષનિવારણઃ ।
ગુણસઙ્ગવિહીનશ્ચ યોગારેર્દર્પનાશનઃ ॥ ૪૭ ॥

આનન્દઃ પરમાનન્દઃ સ્વાનન્દસુખવર્ધનઃ ।
સત્યાનન્દશ્ચિદાનન્દઃ સર્વાનન્દપરાયણઃ ॥ ૪૮ ॥

સદ્રૂપઃ સહજઃ સત્યઃ સ્વાનન્દઃ સુમનોહરઃ ।
સર્વઃ સર્વાન્તરશ્ચૈવ પૂર્વાત્પૂર્વતરસ્તથા ॥ ૪૯ ॥

ખમયઃ ખપરઃ ખાદિઃ ખમ્બ્રહ્મ ખતનુઃ ખગઃ ।
ખવાસાઃ ખવિહીનશ્ચ ખનિધિઃ ખપરાશ્રયઃ ॥ ૫૦ ॥

અનન્તશ્ચાદિરૂપશ્ચ સૂર્યમણ્ડલમધ્યગઃ ।
અમોઘઃ પરમામોઘઃ પરોક્ષઃ વરદઃ કવિઃ ॥ ૫૧ ॥

વિશ્વચક્ષુર્વિશ્વસાક્ષી વિશ્વબાહુર્ધનેશ્વરઃ ।
ધનઞ્જયો મહાતેજાસ્તેજિષ્ઠસ્તૈજસઃ સુખી ॥ ૫૨ ॥

જ્યોતિર્જ્યોતિર્મયો જેતા જ્યોતિષાં જ્યોતિરાત્મકઃ ।
જ્યોતિષામપિ જ્યોતિશ્ચ જનકો જનમોહનઃ ॥ ૫૩ ॥

જિતેન્દ્રિયો જિતક્રોધો જિતાત્મા જિતમાનસઃ ।
જિતસઙ્ગો જિતપ્રાણો જિતસંસારવાસનઃ ॥ ૫૪ ॥

નિર્વાસનો નિરાલમ્બો નિર્યોગક્ષેમવર્જિતઃ ।
નિરીહો નિરહઙ્કારો નિરાશીર્નિરુપાધિકઃ ॥ ૫૫ ॥

નિત્યબોધો વિવિક્તાત્મા વિશુદ્ધોત્તમગૌરવઃ ।

વિદ્યાર્થી પરમાર્થી ચ શ્રદ્ધાર્થી સાધનાત્મકઃ ॥ ૫૬॥

પ્રત્યાહારી નિરાહારી સર્વાહારપરાયણઃ ।
નિત્યશુદ્ધો નિરાકાઙ્ક્ષી પારાયણપરાયણઃ ॥ ૫૭॥

અણોરણુતરઃ સૂક્ષ્મઃ સ્થૂલઃ સ્થૂલતરસ્તથા ।
એકસ્તથાઽનેકરૂપો વિશ્વરૂપઃ સનાતનઃ ॥ ૫૮॥

નૈકરૂપો વિરૂપાત્મા નૈકબોધમયોઽપિ ચ ।
નૈકનામમયશ્ચૈવ નૈકવિદ્યાવિવર્ધનઃ ॥ ૫૯॥

એકશ્ચૈકાન્તિકશ્ચૈવ નાનાભાવવિવર્જિતઃ ।
એકાક્ષરસ્તથા બીજઃ પૂર્ણબિમ્બઃ સનાતનઃ ॥ ૬૦॥

મન્ત્રવીર્યો મન્ત્રબીજઃ શાસ્ત્રવીર્યો જગત્પતિઃ ।
નાનાવીર્યધરશ્ચૈવ શક્રેશઃ પૃથિવીપતિઃ ॥ ૬૧॥

પ્રાણેશઃ પ્રાણદઃ પ્રાણઃ પ્રાણાયામપરાયણઃ ।
પ્રાણપઞ્ચકનિર્મુક્તઃ કોશપઞ્ચકવર્જિતઃ ॥ ૬૨॥

નિશ્ચલો નિષ્કલોઽસઙ્ગો નિષ્પ્રપઞ્ચો નિરામયઃ ।
નિરાધારો નિરાકારો નિર્વિકારો નિરઞ્જનઃ ॥ ૬૩॥

નિષ્પ્રતીતો નિરાભાસો નિરાસક્તો નિરાકુલઃ ।
નિષ્ઠાસર્વગતશ્ચૈવ નિરારમ્ભો નિરાશ્રયઃ ॥ ૬૪॥

નિરન્તરઃ સત્ત્વગોપ્તા શાન્તો દાન્તો મહામુનિઃ ।
નિઃશબ્દઃ સુકૃતઃ સ્વસ્થઃ સત્યવાદી સુરેશ્વરઃ ॥ ૬૫॥

જ્ઞાનદો જ્ઞાનવિજ્ઞાની જ્ઞાનાત્માઽઽનન્દપૂરિતઃ ।
જ્ઞાનયજ્ઞવિદાં દક્ષો જ્ઞાનાગ્નિર્જ્વલનો બુધઃ ॥ ૬૬॥

દયાવાન્ભવરોગારિશ્ચિકિત્સાચરમાગતિઃ ।
ચન્દ્રમણ્ડલમધ્યસ્થશ્ચન્દ્રકોટિસુશીતલઃ ॥ ૬૭॥

યન્તકૃત્પરમો યન્ત્રી યન્ત્રારૂઢપરાજિતઃ ।
યન્ત્રવિદ્યન્ત્રવાસશ્ચ યન્ત્રાધારો ધરાધરઃ ॥ ૬૮॥

તત્ત્વજ્ઞસ્તત્ત્વભૂતાત્મા મહત્તત્ત્વપ્રકાશનઃ ।
તત્ત્વસઙ્ખ્યાનયોગજ્ઞઃ સાઙ્ખ્યશાસ્ત્રપ્રવર્તકઃ ॥ ૬૯॥

અનન્તવિક્રમો દેવો માધવશ્ચ ધનેશ્વરઃ ।
સાધુઃ સાધુવરિષ્ઠાત્મા સાવધાનોઽમરોત્તમઃ ॥ ૭૦॥

નિઃસઙ્કલ્પો નિરાધારો દુર્ધરો હ્યાત્મવિત્પતિઃ ।
આરોગ્યસુખદશ્ચૈવ પ્રવરો વાસવસ્તથા ॥ ૭૧॥

પરેશઃ પરમોદારઃ પ્રત્યક્ચૈતન્યદુર્ગમઃ ।
દુરાધર્ષો દુરાવાસો દૂરત્વપરિનાશનઃ ॥ ૭૨॥

વેદવિદ્વેદકૃદ્વેદો વેદાત્મા વિમલાશયઃ ।
વિવિક્તસેવી ચ સંસારશ્રમનાશનસ્તથા ॥ ૭૩॥

બ્રહ્મયોનિર્બૃહદ્યોનિર્વિશ્વયોનિર્વિદેહવાન્ ।
વિશાલાક્ષો વિશ્વનાથો હાટકાઙ્ગદભૂષણઃ ॥ ૭૪॥

અબાધ્યો જગદારાધ્યો જગદાર્જવપાલનઃ ।
જનવાન્ધનવાન્ધર્મી ધર્મગો ધર્મવર્ધનઃ ॥ ૭૫॥

અમૃતઃ શાશ્વતઃ સાધ્યઃ સિદ્ધિદઃ સુમનોહરઃ ।
ખલુબ્રહ્મખલુસ્થાનો મુનીનાં પરમા ગતિઃ ॥ ૭૬॥

ઉપદ્રષ્ટા તથા શ્રેષ્ઠઃ શુચિર્ભૂતો હ્યનામયઃ ।
વેદસિદ્ધાન્તવેદ્યશ્ચ માનસાહ્લાદવર્ધનઃ ॥ ૭૭॥

દેહદન્યો ગુણાદન્યો લોકાદન્યો વિવેકવિત્ ।
દુષ્ટસ્વપ્નહરશ્ચૈવ ગુરુર્ગુરુવરોત્તમઃ ॥ ૭૮॥

કર્મી કર્મવિનિર્મુક્તઃ સંન્યાસી સાધકેશ્વરઃ ।
સર્વભાવવિહીનશ્ચ તૃષ્ણાસઙ્ગનિવારકઃ ॥ ૭૯॥

ત્યાગી ત્યાગવપુસ્ત્યાગસ્ત્યાગદાનવિવર્જિતઃ ।
ત્યાગકારણત્યાગાત્મા સદ્ગુરુઃ સુખદાયકઃ ॥ ૮૦॥

દક્ષો દક્ષાદિવન્દ્યશ્ચ જ્ઞાનવાદપ્રવર્તકઃ ।
શબ્દબ્રહ્મમયાત્મા ચ શબ્દબ્રહ્મપ્રકાશવાન્ ॥ ૮૧॥

ગ્રસિષ્ણુઃ પ્રભવિષ્ણુશ્ચ સહિષ્ણુર્વિગતાન્તરઃ ।
વિદ્વત્તમો મહાવન્દ્યો વિશાલોત્તમવાઙ્મુનિઃ ॥ ૮૨॥

બ્રહ્મવિદ્બ્રહ્મભાવશ્ચ બ્રહ્મર્ષિર્બ્રાહ્મણપ્રિયઃ ।
બ્રહ્મ બ્રહ્મપ્રકાશાત્મા બ્રહ્મવિદ્યાપ્રકાશનઃ ॥ ૮૩॥

અત્રિવંશપ્રભૂતાત્મા તાપસોત્તમવન્દિતઃ ।
આત્મવાસી વિધેયાત્મા હ્યત્રિવંશવિવર્ધનઃ ॥ ૮૪॥

પ્રવર્તનો નિવૃત્તાત્મા પ્રલયોદકસન્નિભઃ ।
નારાયણો મહાગર્ભો ભાર્ગવપ્રિયકૃત્તમઃ ॥ ૮૫॥

સઙ્કલ્પદુઃખદલનઃ સંસારતમનાશનઃ ।
ત્રિવિક્રમસ્ત્રિધાકારસ્ત્રિમૂર્તિસ્ત્રિગુણાત્મકઃ ॥ ૮૬॥

ભેદત્રયહરશ્ચૈવ તાપત્રયનિવારકઃ ।
દોષત્રયવિભેદી ચ સંશયાર્ણવખણ્ડનઃ ॥ ૮૭॥

અસંશયસ્ત્વસમ્મૂઢો હ્યવાદી રાજનન્દિતઃ ।
રાજયોગી મહાયોગી સ્વભાવગલિતસ્તથા ॥ ૮૮॥

પુણ્યશ્લોકઃ પવિત્રાઙ્ઘ્રિર્ધ્યાનયોગપરાયણઃ ।
ધ્યાનસ્થો ધ્યાનગમ્યશ્ચ વિધેયાત્મા પુરાતનઃ ॥ ૮૯॥

અવિજ્ઞેયો હ્યન્તરાત્મા મુખ્યબિમ્બસનાતનઃ ।
જીવસઞ્જીવનો જીવશ્ચિદ્વિલાસશ્ચિદાશ્રયઃ ॥ ૯૦॥

મહેન્દ્રોઽમરમાન્યશ્ચ યોગેન્દ્રો યોગવિત્તમઃ ।
યોગધર્મસ્તથા યોગસ્તત્ત્વસ્તત્ત્વવિનિશ્ચયઃ ॥ ૯૧॥

નૈકબાહુરનન્તાત્મા નૈકનામપરાક્રમઃ ।
નૈકાક્ષી નૈકપાદશ્ચ નાથનાથોત્તમોત્તમઃ ॥ ૯૨॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સહસ્રરૂપદૃક્ચૈવ સહસ્રારમયોદ્ધવઃ ॥ ૯૩॥

ત્રિપાદપુરુષશ્ચૈવ ત્રિપાદૂર્ધ્વસ્તથૈવ ચ ।
ત્ર્યમ્બકશ્ચ મહાવીર્યો યોગવીર્યવિશારદઃ ॥ ૯૪॥

વિજયી વિનયી જેતા વીતરાગી વિરાજિતઃ ।
રુદ્રો રૌદ્રો મહાભીમઃ પ્રાજ્ઞમુખ્યઃ સદાશુચિઃ ॥ ૯૫॥

અન્તર્જ્યોતિરનન્તાત્મા પ્રત્યગાત્મા નિરન્તરઃ ।
અરૂપશ્ચાત્મરૂપશ્ચ સર્વભાવવિનિર્વૃતઃ ॥ ૯૬॥

અન્તઃ શૂન્યો બહિઃ શૂન્યઃ શૂન્યાત્મા શૂન્યભાવનઃ ।

અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણાત્મા પૂર્ણભાવનઃ ॥ ૯૭॥

અન્તસ્ત્યાગી બહિસ્ત્યાગી ત્યાગાત્મા સર્વયોગવાન્ ।
અન્તર્યાગી બહિર્યાગી સર્વયોગપરાયણઃ ॥ ૯૮॥

અન્તર્ભોગી બહિર્ભોગી સર્વભોગવિદુત્તમઃ ।
અન્તર્નિષ્ઠો બહિર્નિષ્ઠઃ સર્વનિષ્ઠામયસ્તથા ॥ ૯૯॥

બાહ્યાન્તરવિમુક્તશ્ચ બાહ્યાન્તરવિવર્જિતઃ ।
શાન્તઃ શુદ્ધો વિશુદ્ધશ્ચ નિર્વાણઃ પ્રકૃતેઃ પરઃ ॥ ૧૦૦॥

અકાલઃ કાલનેમી ચ કાલકાલો જનેશ્વરઃ ।
કાલાત્મા કાલકર્તા ચ કાલજ્ઞઃ કાલનાશનઃ ॥ ૧૦૧॥

કૈવલ્યપદદાતા ચ કૈવલ્યસુખદાયકઃ ।
કૈવલ્યકલનાધારો નિર્ભરો હર્ષવર્ધનઃ ॥ ૧૦૨॥

હૃદયસ્થો હૃષીકેશો ગોવિન્દો ગર્ભવર્જિતઃ ।
સકલાગમપૂજ્યશ્ચ નિગમો નિગમાશ્રયઃ ॥ ૧૦૩॥

પરાશક્તિઃ પરાકીર્તિઃ પરાવૃત્તિર્નિધિસ્મૃતિઃ ।
પરાવિદ્યા પરાક્ષાન્તિર્વિભક્તિર્યુક્તસદ્ગતિઃ ॥ ૧૦૪॥

સ્વપ્રકાશઃ પ્રકાશાત્મા પરસંવેદનાત્મકઃ ।
સ્વસેવ્યઃ સ્વવિદાં સ્વાત્મા સ્વસંવેદ્યોઽનઘઃ ક્ષમી ॥ ૧૦૫॥

સ્વાનુસન્ધાનશીલાત્મા સ્વાનુસન્ધાનગોચરઃ ।
સ્વાનુસન્ધાનશૂન્યાત્મા સ્વાનુસન્ધાનાશ્રયસ્તથા ॥ ૧૦૬॥

સ્વબોધદર્પણોઽભઙ્ગઃ કન્દર્પકુલનાશનઃ ।
બ્રહ્મચારી બ્રહ્મવેત્તા બ્રાહ્મણો બ્રહ્મવિત્તમઃ ॥ ૧૦૭॥

તત્ત્વબોધઃ સુધાવર્ષઃ પાવનઃ પાપપાવકઃ ।
બ્રહ્મસૂત્રવિધેયાત્મા બ્રહ્મસૂત્રાર્ધનિર્ણયઃ ॥ ૧૦૮॥

આત્યન્તિકો મહાકલ્પઃ સઙ્કલ્પાવર્તનાશનઃ ।
આધિવ્યાધિહરશ્ચૈવ સંશયાર્ણવશોષકઃ ॥ ૧૦૯॥

તત્ત્વાત્મજ્ઞાનસન્દેશો મહાનુભવભાવિતઃ ।
આત્માનુભવસમ્પન્નઃ સ્વાનુભાવસુખાશ્રયઃ ॥ ૧૧૦॥

અચિન્ત્યશ્ચ બૃહદ્ભાનુઃ પ્રમદોત્કર્ષનાશનઃ ।
અનિકેતપ્રશાન્તાત્મા શૂન્યવાસો જગદ્વપુઃ ॥ ૧૧૧॥

ચિદ્ગતિશ્ચિન્મયશ્ચક્રી માયાચક્રપ્રવર્તકઃ ।
સર્વવર્ણવિદારમ્ભી સર્વારમ્ભપરાયણઃ ॥ ૧૧૨॥

પુરાણઃ પ્રવરો દાતા સુન્દરઃ કનકાઙ્ગદી ।
અનિસૂયાત્મજો દત્તઃ સર્વજ્ઞઃ સર્વકામદઃ ॥ ૧૧૩॥

કામજિત્કામપાલશ્ચ કામી કામપ્રદાગમઃ ।
કામવાન્કામપોષશ્ચ સર્વકામનિવર્તકઃ ॥ ૧૧૪॥

સર્વકર્મફલોત્પત્તિઃ સર્વકામફલપ્રદઃ ।
સર્વકર્મફલૈઃ પૂજ્યઃ સર્વકર્મફલાશ્રયઃ ॥ ૧૧૫॥

વિશ્વકર્મા કૃતાત્મા ચ કૃતજ્ઞઃ સર્વસાક્ષિકઃ ।
સર્વારમ્ભપરિત્યાગી જડોન્મત્તપિશાચવાન્ ॥ ૧૧૬॥

ભિક્ષુર્ભિક્ષાકરશ્ચૈવ ભૈક્ષાહારી નિરાશ્રમી ।
અકૂલશ્ચાનુકૂલશ્ચ વિકલો હ્યકલસ્તથા ॥ ૧૧૭॥

જટિલો વનચારી ચ દણ્ડી મુણ્ડી ચ ગણ્ડવાન્ ।
દેહધર્મવિહીનાત્મા હ્યેકાકી સઙ્ગવર્જિતઃ ॥ ૧૧૮॥

આશ્રમ્યનાશ્રમારમ્ભોઽનાચારી કર્મવર્જિતઃ ।
અસન્દેહી ચ સન્દેહી ન કિઞ્ચિન્ન ચ કિઞ્ચનઃ ॥ ૧૧૯॥

નૃદેહી દેહશૂન્યશ્ચ નાભાવી ભાવનિર્ગતઃ ।
નાબ્રહ્મચ પરબ્રહ્મ સ્વયમેવ નિરાકુલઃ ॥ ૧૨૦॥

અનઘશ્ચાગુરુશ્ચૈવ નાથનાથોત્તમો ગુરુઃ ।
દ્વિભુજઃ પ્રાકૃતશ્ચૈવ જનકશ્ચ પિતામહઃ ॥ ૧૨૧॥

અનાત્મા ન ચ નાનાત્મા નીતિર્નીતિમતાં વરઃ ।
સહજઃ સદૃશઃ સિદ્ધશ્ચૈકશ્ચિન્માત્ર એવ ચ ॥ ૧૨૨॥

ન કર્તાપિ ચ કર્તા ચ ભોક્તા ભોગવિવર્જિતઃ ।
તુરીયસ્તુરીયાતીતઃ સ્વચ્છઃ સર્વમયસ્તથા ॥ ૧૨૩॥

સર્વાધિષ્ઠાનરૂપશ્ચ સર્વધ્યેયવિવર્જિતઃ ।
સર્વલોકનિવાસાત્મા સકલોત્તમવન્દિતઃ ॥ ૧૨૪॥

દેહભૃદ્દેહકૃચ્ચૈવ દેહાત્મા દેહભાવનઃ ।
દેહી દેહવિભક્તશ્ચ દેહભાવપ્રકાશનઃ ॥ ૧૨૫॥

લયસ્થો લયવિચ્ચૈવ લયાભાવશ્ચ બોધવાન્ ।
લયાતીતો લયસ્યાન્તો લયભાવનિવારણઃ ॥ ૧૨૬॥

વિમુખઃ પ્રમુખશ્ચૈવ પ્રત્યઙ્મુખવદાચરી ।
વિશ્વભુગ્વિશ્વધૃગ્વિશ્વો વિશ્વક્ષેમકરસ્તત્જા ॥ ૧૨૭॥

અવિક્ષિપ્તોઽપ્રમાદી ચ પરર્દ્ધિઃ પરમાર્થદૃક્ ।
સ્વાનુભાવવિહીનશ્ચ સ્વાનુભાવપ્રકાશનઃ ॥ ૧૨૮॥

નિરિન્દ્રિયશ્ચ નિર્બુદ્ધિર્નિરાભાસો નિરાકૃતઃ ।
નિરહઙ્કારશ્ચરૂપાત્મા નિર્વપુઃ સકલાશ્રયઃ ॥ ૧૨૯॥

શોકદુઃખહરશ્ચૈવ ભોગમોક્ષફલપ્રદઃ ।
સુપ્રસન્નસ્તથા સૂક્ષ્મઃ શબ્દબ્રહ્માર્થસઙ્ગ્રહઃ ॥ ૧૩૦॥

આગમાપાયશૂન્યશ્ચ સ્થાનદશ્ચ સતાઙ્ગતિઃ ।
અકૃતઃ સુકૃતશ્ચૈવ કૃતકર્મા વિનિર્વૃતઃ ॥ ૧૩૧॥

ભેદત્રયવરશ્ચૈવ દેહત્રયવિનિર્ગતઃ ।
સર્વકામમયશ્ચૈવ સર્વકામનિવર્તકઃ ॥ ૧૩૨॥

સિદ્ધેશ્વરોઽજરઃ પઞ્ચબાણદર્પહુતાશનઃ ।
ચતુરક્ષરબીજાત્મા સ્વભૂશ્ચિત્કીર્તિભૂષણઃ ॥ ૧૩૩॥

અગાધબુદ્ધિરક્ષુબ્ધશ્ચન્દ્રસૂર્યાગ્નિલોચનઃ ।
યમદંષ્ટ્રોઽતિસંહર્તા પરમાનન્દસાગરઃ ॥ ૧૩૪॥

લીલાવિશ્વમ્ભરો ભાનુર્ભૈરવો ભીમલોચનઃ ।
બ્રહ્મચર્યામ્બરઃ કાલસ્ત્વચલશ્ચલનાન્તકઃ ॥ ૧૩૫॥

આદિદેવો જગદ્યોનિર્વાસવારિવિમર્દનઃ ।
વિકર્મકર્મકર્મજ્ઞોઽનન્યગમકોઽગમઃ ॥ ૧૩૬॥

અબદ્ધકર્મશૂન્યશ્ચ કામરાગકુલક્ષયઃ ।
યોગાન્ધકારમથનઃ પદ્મજન્માદિવન્દિતઃ ॥ ૧૩૭॥

ભક્તકામોઽગ્રજશ્ચક્રી ભાવનિર્ભાવભાવકઃ ।

ભેદાન્તકો મહાનગ્નો નિગૂહો ગોચરાન્તકઃ ॥ ૧૩૮॥

કાલાગ્નિશમનઃ શઙ્ખચક્રપદ્મગદાધરઃ ।
દીપ્તો દીનપતિઃ શાસ્તા સ્વચ્છન્દો મુક્તિદાયકઃ ॥ ૧૩૯॥

વ્યોમધર્મામ્બરો ભેત્તા ભસ્મધારી ધરાધરઃ ।
ધર્મગુપ્તોઽન્વયાત્મા ચ વ્યતિરેકાર્થનિર્ણયઃ ॥ ૧૪૦॥

એકાનેકગુણાભાસાભાસનિર્ભાસવર્જિતઃ ।
ભાવાભાવસ્વભાવાત્મા ભાવાભાવવિભાવવિત્ ॥ ૧૪૧॥

યોગિહૃદયવિશ્રામોઽનન્તવિદ્યાવિવર્ધનઃ ।
વિઘ્નાન્તકસ્ત્રિકાલજ્ઞસ્તત્ત્વાત્મા જ્ઞાનસાગરઃ ॥ ૧૪૨॥

ઇતીદં દત્તસાહસ્રં સાયં પ્રાતઃ પઠેત્તુ યઃ ।
સ ઇહામુત્ર લભતે નિર્વાણં પરમં સુખમ્ ॥ ૧૪૩॥

ગુરુવારે દત્તભક્તો ભક્તિભાવસમન્વિતઃ ।
પઠેત્સદૈવ તો હ્યેતત્સ લભેચ્ચિન્તિતં ધ્રુવમ્ ॥ ૧૪૪॥

ઇતિ શ્રીમદ્દત્તાત્રેયપુરાણોક્તં
શ્રીમદ્દત્તાત્રેયસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

(The above is from the dattAtreyamanjarI.
SDspecific The Telugu book in Indexextra scan-link
has additional phalashruti verses as given below
with last two in the above placed in the end.

નામરૂપાત્મકં ચૈવ અવાઙ્માનસ ગોચરં ।
સર્વં દત્તાત્મકં વિશ્વં ભાવાભાવોદ્ભવાત્મકમ્ ॥ ૧૪૩॥

ઇતિ શ્રી પરમં દિવ્યં પવિત્રં પાપનાશનમ્ ।
દત્તાત્રેયસહસ્રાખ્યં નામસ્તોત્રં કૃતં મયા ॥ ૧૪૪॥

અતીતાનાગતં ચૈવ વર્તમાનં તથૈવ ચ ।
તદ્વિદુર્યે પઠં ત્યેતત્ ગુહ્યાદ્ગુહ્યતરં પરમ્ ॥ ૧૪૫॥

શ્ૃત્વેદં પરમં પુણ્યં મર્ત્યો હ્યમૃતમશ્નુતે ।
સહસ્રનામકં સ્તોત્રં શ્રદ્ધયા પરયા ભુવિ ॥ ૧૪૬॥

ઇદં સ્તોત્રમુપાશ્રિત્ય મર્ત્યશ્ચાત્મનિ સંસ્થિતઃ ।

પરંસ્થાનમવાપ્નોતિ શઙ્કરં પ્રકૃતે પરમ્ ॥ ૧૪૭॥

એકૈકમક્ષરં પુંસાં મણિમાદ્યષ્ટસિદ્ધિદમ્ ।
સર્વપાપહરં ચૈવ બ્રહ્મનિર્વાણદાયકમ્ ॥ ૧૪૮॥

શિવં પૂર્ણં પરં ચૈવ નિત્યં શુદ્ધં નિરઞ્જનમ્ ।
નિધાનં પરમં દિવ્યં દત્તાત્રેયં જગદ્ગુરુમ્ ॥ ૧૪૯॥

નિરીહં પ્રતિમાશૂન્યં સત્વગં ગગનોપમમ્ ।
વિશુદ્ધમક્ષરં પૂર્ણં દત્તાત્રેયં જગદ્ગુરુમ્ ॥ ૧૫૦॥

અવાચ્યં પ્રણવાતીતં નિષ્પ્રપઞ્ચં નિરાકલમ્ ।
સત્યં સિદ્ધં મનોઽગમ્યં દત્તાત્રેયં જગદ્ગુરુમ્ ॥ ૧૫૧॥

કારણં કારણાનાં ચ નામરૂપવિવર્જિતમ્ ।
પરમં પરમાનન્દં દત્તાત્રેયં જગદ્ગુરમ્ ॥ ૧૫૨॥

શાશ્વતં સહજં શાન્તં પવિત્રં ચ ગુણાતિગમ્ ।
સત્યં સનાતનં સૂક્ષ્મં દત્તાત્રેયં જગદ્ગુરમ્ ॥ ૧૫૩॥

નિરાકારં નિરાભાસં નિષ્કલઙ્કં નિરામયમ્ ।
નિરાલમ્બં નિજાનન્દં દત્તાત્રેયં જગદ્ગુરમ્ ॥ ૧૫૪॥

દેશકાલાર્થનિર્મુક્તં દેશકાલસમાશ્રયમ્ ।
પરાપરવિનિર્મુક્તં દત્તાત્રેયં જગદ્ગુરમ્ ॥ ૧૫૫॥

નિગીશ્વરં નિર્વિકારં નિર્મલજ્ઞાનરૂપિણમ્ ।
ગુણાદન્યમહં વન્દે દત્તાત્રેયં જગદ્ગુરમ્ ॥ ૧૫૬॥

ય ઇદં પઠતે નિત્યં પાઠયેદ્વાસમાહિત ।
સર્વાન્કામાનવાપ્નોતિ દત્તાત્રેયો પ્રસાદતઃ ॥ ૧૫૭॥

ઇતીદં દત્તસાહસ્રં સાયં પ્રાતઃ પઠેત્તુ યઃ ।
સ ઇહામુત્ર લભતે નિર્વાણં પરમં સુખમ્ ॥ ૧૫૮॥

ગુરુવારે દત્તભક્તો ભક્તિભાવસમન્વિતઃ ।
પઠેત્સદૈવ તો હ્યેતત્સ લભેચ્ચિન્તિતં ધ્રુવમ્ ॥ ૧૫૯॥

ઇતિ શ્રીબ્રહ્મણ્ડપુરાણે અનુકૂલાગમે સનત્કુમાર
બ્રહ્મઋષિ સંવાદે શ્રીદત્તાત્રેય સહસ્રનામસ્તોત્રં સંપૂર્ણમ્ ॥)

(Not sure about the placement of the
stotra in the Brahmandapurana)

Proforead by NA

*Shri Dattatreya Sahasranama Stotram 2*

pdf was typeset on October 1, 2023

Please send corrections to *sanskrit@cheerful.com*